# संस्कृत वार्ता:

दिनाङ्क : 09/09/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- केन्द्रीय-मन्त्रिमण्डलेन विंशतिसहस्र कोट्यधिक-व्ययेन अष्ट-रेल-बहुपथ-प्रकल्पाः अनुमोदिता:; 'स्वर्णिम-चतुर्भुज-मार्गस्य' चतुष्पथीकरणाय च स्वीकृतिः प्रदत्ता।
- श्रीलङ्का-वायुसेनायाः 'एल-70' प्रक्षेपकाणाम् आधुनिकीकरणाय भारत-श्रीलङ्का-सैन्य-संधिः हस्ताक्षरितं गतः , स्व-भूमिः भारत-विरोधि-कृत्येभ्यः न प्रयुज्यते इति कोलम्बो-प्रशासनेन आश्वासितम्।
- आगामिनः ब्रिक्स-शिखर-सम्मेलनस्य पूर्वाङ्ग-रूपेण मुम्बईय्यां ब्रिक्स-वित्त-मन्त्रिणां, केन्द्रीय-बैङ्क-नियामकानां च अन्तिमा महत्त्वपूर्णा उपवेशन-सङ्गोष्ठी साम्प्रतं प्रचलति।
- चीनदेशस्य शाङ्घाई-नगरे आयोज्यमानायां 'विश्व-कौशल-स्पर्धायाम्' भारतं प्रथमवारं एकादशसु नवीनासु कौशल-श्रेणीषु भागं ग्रहीष्यति।
- अपि च..... अहमदाबादे प्रचलन्त्याः विश्व-दिव्याङ्ग-धनुर्क्रीडायाः अन्तिमे दिवसे भारतेन उत्कृष्ट-प्रदर्शनेन द्वे सुवर्णपदके चत्वारि च कांस्य-पदकानि स्वायत्तीकृतानि।

---------------------------------------------------------

<u>मन्त्रिमण्डल</u>

केन्द्रीय-मन्त्रिमण्डलं रेल-सञ्चालस्य अभूतपूर्व-विस्ताराय क्षमता-संवर्धनाय च विंशति-सहस्र-कोट्यधिक रूप्यकाणां व्ययेन निर्मीयमानेभ्यः अष्ट-बहुपथ-रेल-प्रकल्पेभ्यः स्वीकृतिं प्रादात्। नवदेहल्यां संवाददातॄन् सम्बोधयन् सूचना-प्रसारण-रेल-मन्त्री अश्विनी-वैष्णवः प्रावोचत् यत् एतेषु प्रथम-चरणे पश्चिम-बङ्गाल-झारखण्ड-ओडिशा-मध्यप्रदेश-छत्तीसगढ़-राज्येषु व्याप्त-चतुर्दश-मण्डलेषु नूतन-मार्गस्य निर्माणं विधास्यते। अस्मिन् 'खड़कपुर-झारसुगुडा' चतुर्थ-पथः, 'कटनी-पेण्ड्रा-रोड' चतुर्थ-पथः, तथा 'बिलासपुर-पेण्ड्रा-रोड' तृतीय-पथः समाविष्टाः सन्ति। अनेन सहैव मन्त्रिमण्डलेन तमिलनाडु-आन्ध्रप्रदेश-कर्नाटक-तेलङ्गाना-राज्येषु

चत्वारिंशदुत्तरपंचशत किलोमीटर-परिमित-विस्ताराय एक-विंशत्युत्तर दश-सहस्र-कोटि रूप्यकाणां अन्य-पञ्च-परियोजनाः अपि अनुमोदिताः। मन्त्रिणा सविशेषं प्रख्यापितं यत् सर्वकारेण देशस्य सप्त-उच्च-सान्द्रता-रेल-वीथिनां चतुष्पथीकरणम् विधातुं निर्णयः गृहीतः। एतेषु देहली-हावड़ा, मुम्बयी-हावड़ा, देहली-मुम्बयी, देहली-गुवाहाटी, देहली-चेन्नई, हावड़ा-चेन्नई तथा मुम्बयी-चेन्नई इति सप्त-प्रमुखाः मार्गाः सन्ति, येन रेलयान-विलम्बस्य समस्या मूलतः विनङ्क्ष्यति।

---

## भारत-श्रीलङ्का

भारतस्य रक्षामन्त्री राजनाथसिंहः अद्य कोलम्बो-नगरे श्रीलङ्कायाः राष्ट्रपतिना अनुरा-कुमार-दिसानायके इत्यमुना सह महत्त्वपूर्णाम् मन्त्रणां व्यदधात् । उपवेशनावधौ उभौ नेतारौ प्रत्यपादयतां यत् उभावपि देशौ निकट-प्रतिवेशिनौ, सामुद्रिक-सहयोगिनौ च स्तः इति हेतोः भारतं श्रीलङ्का च उभयोः राष्ट्रयोः समग्र-विकासाय, जन-कल्याणाय च परस्पर-सहयोगं सातत्येन निर्वहिष्यतः। सामाजिक-सञ्चार-पटले रक्षामन्त्रिणा न्यरूप्यत यत् अस्मिन् क्षेत्रे सुरक्षायाः, स्थैर्यस्य, शान्तेः, समृद्धेः च संवर्धनाय उभौ देशौ संयुक्ततया कार्यं विधास्यतः। रक्षामन्त्री ह्यः त्रिदिवसीय-यात्रायाः अङ्गतया कोलम्बो-नगरं सम्प्राप्तवान्, रक्षामन्त्री राजनाथ-सिंहः रक्षा-विदेश-मन्त्रालययोः वरिष्ठाधिकारिभिः समन्वितस्य उच्चस्तरीय-प्रतिनिधि-मण्डलस्य नेतृत्वं विधत्ते। रक्षामन्त्रिणः हार्दिकं स्वागतं व्याहरन् श्रीलङ्कायाः राष्ट्रपतिः दिसानायके भारतस्य प्रधानमन्त्रिणा नरेन्द्र-मोदिना सह स्वकीयं पूर्वतनं संवादं सस्मार, अथ च दृढतया पुनरुदघोषयत् यत् श्रीलङ्का स्वकीयायाः भूमेः उपयोगं भारतस्य सुरक्षा-हितान् बाधमानानां शत्रुतापूर्ण-गतिविधीनां कृते कदापि न अनुमंस्यते । अवसरेऽस्मिन् उभयतः श्रीलङ्का-वायुसेनायाः कृते L70 प्रक्षेपास्त्राणां उन्नयनाय च द्वयोः देशयोः एन-सी-सी, एन-डी-सी इत्यनयोः च मध्ये सहयोगाय सहमति-पत्राणाम् आदान-प्रदानं व्यधायि। श्रीलङ्का-वायुसेनायाः षण्णां L-70 प्रक्षेपास्त्राणां उन्नयन-प्रकल्पः भारत-सर्वकारस्य अनुदान-साहाय्यान्तर्गतं वर्तते। उभौ नेतारौ भारतीय-सुरक्षा-बलैः विनिर्मितानां त्रयाणां बैली-सेतूनां आभासीय-माध्यमेन लोकार्पणम् अकुरुताम्। अनन्तरं प्रवासि-भारतीय-समुदायेन सह संवाद-काले रक्षामन्त्रिणा

श्रीलङ्कास्थः भारतीय-समुदायः उभयोः देशयोः मध्ये सम्पर्क-सेतुः इति अभिहितः । श्रीसिंहेन उद्घोषितं यत् सङ्कट-काले भारतं सर्वदैव श्रीलङ्कादेशेन सह दृढतया स्थास्यति। उभयोः राष्ट्रयोः मध्ये सांस्कृतिक-सभ्यतागत-सम्बन्धाः सन्ति । स्वीये सम्बोधने भारतस्य द्रुतगामि-आर्थिक-परिवर्तनं प्रतिपादयन् रक्षामन्त्री अवोचत् यत् भारतं विश्वस्य तीव्रतम-विकासशील-अर्थव्यवस्थासु अग्रगण्यतां भजते, यच्च वैश्विक-आर्थिक-वृद्धौ षोडश-प्रतिशतादधिकम् योगदानम् आविष्करोति।

---------------------------------------------------------

## मुंबई-ब्रिक्सवित्तमन्त्री

आगामिनः ब्रिक्स-शिखर-सम्मेलनस्य पूर्वाङ्ग-रूपेण मुम्बईय्यां ब्रिक्स-वित्त-मन्त्रिणां, केन्द्रीय-बैङ्क-नियामकानां च अन्तिमा महत्त्वपूर्णा उपवेशन-सङ्गोष्ठी साम्प्रतं प्रचलति। अस्मिन् वर्षे ब्रिक्स-वित्त-धारायाः मुख्य-विषयः दृढतायै, नवीनीकरणाय, सहयोगाय, शाश्वत-विकासाय च निर्माणम्" इति निर्धारितम् अस्ति। अस्याः शृङ्खलायाः पूर्वतनं समुपवेशनं गतमासे जयपुराभिधाने नगरे सञ्जातम् । मुम्बई-नगरे निर्धारित-अन्तिमोपवेशनात् प्राक् केन्द्रीय-वित्तमन्त्रिणा निर्मला-सीतारमण इत्यनया ब्रिक्स-वित्त-मार्गस्य प्रमुख-निष्कर्षाणां सविस्तरा समीक्षा व्यधायि।

---------------------------------------------------------

## कौशल-विकास

चीनदेशस्य शाङ्घाई-नगरे अस्मिन् मासे द्वाविंशतिः दिनाङ्कतः सप्तविंशतिः दिनाङ्कं यावत् आयोज्यमानायां अष्टचत्वारिंशत्तमायाम् 'विश्व-कौशल-स्पर्धायाम्' भारतं प्रथमवारं एकादशसु नवीनासु कौशल-श्रेणीषु भागं ग्रहीष्यति।

कौशल-विकास-उद्यमिता-मन्त्रालयः प्रत्यपादयत् यत् 'स्किल-इण्डिया' दलम् चतुःषष्टि-कौशलेभ्यः त्रिषष्टि-कौशलेषु प्रायः सप्तति-प्रतियोगिनां दलेन सह सहभागितां विधास्यति। मन्त्रालयस्य अनुसारम् एषा अद्यावधि विश्व-कौशल-स्पर्धायां भारतस्य अत्यन्तं

विविधतापूर्णयुता सहभागिता अस्ति। एतासु एकादश-नवीन-श्रेणीषु 'दन्त-कृत्रिम-अङ्ग-निर्माणम्' 'डिजिटल-इण्टरएक्टिव-मीडिया-डिजाइन' इत्यादयः विषयाः समाविष्टाः सन्ति।

भारतस्य सहभागिताविषये वदन्त्या कौशल-विकास-उद्यमिता-मन्त्रालयस्य सचिवया देवश्री-मुखर्जी-वर्यया उक्तं यत्, एतासु नवीनासु श्रेणीषु भारतस्य सहभागिता देशस्य कौशल-पारिस्थितिकी-तन्त्रस्य भविष्योन्मुखताम् वैश्विक-प्रासङ्गिकतां च दर्शयति। सा एतदपि उक्तवती यत् दृढ-सहयोगेन सर्वकारः युवानाम् कृते आत्मविश्वासेन वैश्विक-प्रतिस्पर्धायाम् अवतीर्य उत्तम-मानकान् प्राप्तुं मार्गं प्रशस्तं करोति।

---

## मादक-द्रव्याणि गृहीतानि

राजस्व-गुप्तचर-निदेशालयेन विगत-पक्षद्वये देशव्यापि-अभियानेषु प्रायः-चत्वारिंशतोत्तर सप्तशत किलोग्राम-परिमितं गाञ्जा-चरसादि-मादक-द्रव्यं गृहीतम्।

एजेन्सी-संस्थया 'स्वापक-द्रव्य-मनोभावात्मक-पदार्थ-अधिनियमस्य' प्रावधानान्तर्गतम् त्रयोदश जनाः निगृहीताः। एषा अभियान-श्रृङ्खला रेल-वायु-मार्गेभ्यः विशेषतः वाहनानां गुप्त-कोष्ठेभ्यः क्रियमाणं मादक-द्रव्याणां अवैध-व्यापारं रोधयितुम् 'डी.आर.आई.'-संस्थायाः निरन्तर-प्रयासान् दर्शयति।

---

## कर्णाटके प्रवर्तन-निदेशालयेन अन्वेषणम्

प्रवर्तन-निदेशालयेन कर्णाटक-राज्ये अष्टादश स्थानेषु सघनान्वेषणम् विहितम्। एतेषु राज्यस्य लोकनिर्माण-मन्त्रिणः सतीश-जार्कीहोली-इत्यस्य, तस्य पुत्र्याः सहैव लोकसभा-सांसद्-प्रियङ्का-जार्कीहोली इत्यस्याः आवासः अन्तर्भवति। एतदतिरिच्य, मन्त्रिणः श्यालकस्य वाई-मञ्जुनाथस्य गृहे अपि अन्वेषणं विहितम्। संस्थायाः अनुसारम् एषः विषयः मञ्जुनाथ-वर्यस्य विरुद्धं प्रवृत्तेन भ्रष्टाचार-प्रकरणेन सह सम्बद्धः नास्ति, अपि तु सतीश-जार्कीहोली-वर्यस्य विरुद्धं पृथक्-रूपेण प्रवृत्तेन 'धन-शोधन'-प्रकरणेन सह सम्बद्धः अस्ति।

-------------------------------------------------------

## वायु-प्रदूषण

राष्ट्रीय-राजधानी-क्षेत्राय तन्निकटवर्ती-क्षेत्रेभ्यश्च वायु-गुणवत्ता-प्रबन्धन-आयोगेन उद्घोषितं यत् आयोगस्य संवैधानिक-निर्देशानां प्रभावी कार्यान्वयनम् एन.सी.आर.-क्षेत्रे वायु-प्रदूषणस्य निवारणाय शमनाय च अत्यन्तं निर्णायकम् अस्ति। आयोगेन बलेन प्रतिपादितं यत् सम्बद्ध-प्राधिकरणाः आयोगस्य आज्ञानाम् सामयिकं परिपालनं सुनिश्चित्य क्षेत्र-स्तरे प्रभाविकार्यान्वयनाय निरीक्षण-प्रवर्तन-तन्त्रं सुदृढीकुर्युः।

ह्यः आयोगस्य अध्यक्षस्य श्री-राजेश-वर्मा-वर्यस्य अध्यक्षतायाम् हरियाणा-राज्य-प्रदूषण-नियन्त्रण-आयोगेन सह आयोगस्य संवैधानिक-निर्देशानाम् अनुपालनम् अधिकृत्य एका समीक्षा-सभा समायोजिता। एतेषु निर्देशेषु पञ्चशत-वर्गमीटर-परिमित-ततोऽधिक-क्षेत्रफल-युक्तानां सर्वेषां निर्माण-विध्वंस-परियोजनानाम् राज्यस्य जाल-पटले पञ्जीकरणं तथा च धूलि-नियन्त्रण-उपायानाम् सुदूर-परीक्षणाय क्रियाशील-वीडियो-निरीक्षण-प्रणाल्याः संस्थापनम् अनिवार्यं विहितम्।

तथापि, आयोगस्य निरीक्षण-अभियानेषु बह्व्यः विसङ्गतयः परिदृष्टाः, यासु अपूर्णाः अपर्याप्ताः वा वेब-कैमरा-लिङ्क, अक्रियाशीलाः जाल-सम्पर्काः, तथा सफलाभिलेखनानन्तरमपि चित्रग्राहिणाम् 'ऑफलाइन'-स्थितौ अवस्थानं समाविष्टम् अस्ति।

-------------------------------------------------------

## धनुर्क्रीडायाः

अहमदाबादे प्रचलन्त्याः विश्व-दिव्याङ्ग-धनुर्क्रीडायाः अन्तिमे दिवसे भारतेन उत्कृष्ट-प्रदर्शनेन द्वे सुवर्णपदके चत्वारि च कांस्य-पदकानि स्वायत्तीकृतानि। अत्र वर्तमान-पैरालम्पिक-विजेता हरविन्दर-सिंहः, विश्व-प्रथमाङ्किता शीतल-देवी च भारतीय-दलस्य नेतृत्वं व्यधत्ताम्।

इति वार्ताः ।।